# અપમૃત્યુહરં મહામૃત્યુઞ્જય સ્તોત્રમ

## Apamrutyuharam Mahamrutyunjjaya Stotram

---

અપમૃત્યુહરં મહામૃત્યુઞ્જય સ્તોત્રમ |

ઔમ અસ્ય શ્રીમહામૃત્યઞ્જયસ્તોત્રમન્ત્રસ્ય શ્રીમાર્કણ્ડેય ઋષિઃ,
અનુષ્ટુપ છન્દઃ, શ્રીમૃત્યુઞ્જયો દેવતા, ગૌરી શક્તિઃ,
મમ સર્વારિષ્ટસમસ્તમૃત્યુશાન્ત્યર્થં સકલૈશ્વર્યપ્રાપ્ત્યર્થં
ચ જપે વિનિયોગઃ |

અથ ધ્યાનમ ||

ચન્દ્રાર્કાગ્નિવિલોચનં સ્મિતમુખં પદ્મદ્વયાન્તઃ સ્થિતં
મુદ્રાપાશમૃગાક્ષસત્રવિલસત્પાણિં હિમાંશુપ્રભુમ |

કોટીન્દુપ્રગલત્સુધાપ્લુતતનું હારાદિભૂષોજ્જ્વલં
કાન્તં વિશ્વવિમોહનં પશુપતિં મૃત્યુઞ્જયં ભાવયેત |

ઔમ રુદ્રં પશુપતિં સ્થાણું નીલકણ્ઠમુમાપતિમ |
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્ય્અતિ ||૧||

નીલકણ્ઠં કાલમૂર્તિં કાલજ્ઞં કાલનાશનમ |
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્ય્અતિ ||૨||

નીલકણ્ઠં વિરૂપાક્ષં નિર્મલં નિલયપ્રભમ |
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ||૩||

વામદેવં મહાદેવં લોકનાથં જગદ્ગુરુમ |
નમામિ શિરસા દેવં કિંનો મૃત્યુઃ કરિષ્યતિ ||૪||

દેવદેવં જગન્નાથં દેવેશં વૃષભધ્વજમ |
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ||૫||

ગઙ્ગાધરં મહાદેવં સર્વાભરણભૂષિતમ |
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ||૬||

અનાધઃ પરમાનન્દં કૈવલ્યપદગામિનિ |
નમામિ શિરસા દેવં કિંનો મૃત્યુઃ કરિષ્યતિ ||૭||

સ્વર્ગાપવર્ગદાતારં સૃષ્ટિસ્થિતિવિનાશકમ ।
નમામિ શિરસા દેવં કિંનો મૃત્યુઃ કરિષ્યતિ ।।૮।।

ઉત્પત્તિસ્થિતિસંહારં કર્તારમીશ્વરં ગુરુમ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।।૯।।

માર્કણ્ડેયકૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
તસ્ય મૃત્યુભયં નાસ્તિ નાગ્નિચૌરભયં ક્વચિત ।।૧૦।।

શતાવર્તં પ્રકર્તવ્યં સઙ્કટે કષ્ટનાશનમ ।
શુચિર્ભૂત્વા પઠેત્સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ ।।૧૧।।

મૃત્યુઞ્જય મહાદેવ ત્રાહિ માં શરણાગતમ ।
જન્મમૃત્યુજરારોગૈઃ પીડિતં કર્મબન્ધનૈઃ ।।૧૨।।

તાવતસ્ત્વદ્ગતપ્રાણસ્ત્વચ્ચિત્તોઽહં સદા મૃડ ।
ઇતિ વિજ્ઞાપ્ય દેવેશં ત્ર્યંબકાખ્યં મનું જપેત ।।૧૩।।

નમઃ શિવાય સામ્બાય હરયે પરમાત્મને ।
પ્રણતક્લેશનાશાય યોગિનાં પતયે નમઃ ।।૧૪।।

શતાઙ્ગાયુર્મંત્રઃ । ૐમ હ્રીં શ્રીં હ્રીં હ્રૈં હઃ હન હન દહ દહ પચ પચ
ગૃહાણ ગૃહાણ મારય મારય મર્દય મર્દય મહામહાભૈરવ ભૈરવરૂપેણ
ધુનય ધુનય કમ્પય કમ્પય વિઘ્નય વિઘ્નય વિશ્વેશ્વર ક્ષોભય ક્ષોભય
કટુકટુ મોહય મોહય હું ફટ સ્વાહા ।।
ઇતિ મન્ત્રમાત્રેણ સમાભીષ્ટો ભવતિ ।।૧૫।।

ઇતિ શ્રીમાર્કણડેયપુરાણે માર્કણ્ડેયકૃતમપમૃત્યુહરં
મહા મૃત્યુઞ્જયસ્તોત્રં સંપૂર્ણમ ।।

---